**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहिःस्थ**

**परीक्षा: मे – २०२५**

**सत्र २ रे**

**विषय: साहित्य–२ (मुद्राराक्षस) (22E326)**

**दिनांक: २४/०५/२०२५** **गुण : १००** **वेळ : स. १०.०० ते १.००**

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १. चतुर्णां श्लोकानां स्वभाषया अनुवादं कुरुत।** **(२४)**

१. द्रव्यं जिगीषुमधिगम्य जडात्मनोऽपि नेतुर्यशस्विनि पदे नियतंप्रतिष्ठा ।
अद्रव्यमेत्य भुवि शुद्धनयोऽपि मन्त्री शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या ॥

२. भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना किं चाणक्यनिराकृतेन कृतिना मौर्येण संधास्यते ।
स्थैर्यं भक्तिगुणस्य वाधिगणयन्किं सत्यसंधो भवेदित्यारूढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥

३. विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्वक्रनासादिभिर्नन्दे जीवति या तदा न गमिता स्थैर्यं चलन्ती मुहुः।
तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत् कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत्पृथक् ॥

४. वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम् ।
चिन्तावेशसमाकुलेन मनसा रात्रिंदिवं जाग्रतः सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते ॥

५. नृपोपकृष्टः सचिवात्तदर्पण स्तनंधयोऽस्यन्तशिशुः स्तनादिव । अदृष्टलोकव्यवहारमन्दधीर्मुहूर्तमप्युत्सहते न वर्तितुम् ॥

६. पतिं त्यक्त्वा देवं भुवनपतिगुच्चैरभिजनं गता छिद्रेण श्रीर्वृषलमविनीतेव वृषली ।
स्थिरीभूता चासिन्किमिह करवाम स्थिरमपि प्रयत्नं न येषां विफलयति दैवं द्विषदिव ॥

**प्र.२. पञ्च वाक्यानि ससन्दर्भं स्पष्टयत।** **(३०)**

१. सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि किं पुनरसन्तम् ।

२. ननु वक्तव्यं संयमितः सपुत्रकलत्रो राक्षस इति।

३. शकटदासस्तु मित्रमिति च विसंवदन्त्यक्षराणि ।

४. आः क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति ।

५. एकमपि नीतिबीजं बहुफलतामेति यस्य तव ।

६. मारयति सर्वलोकं यस्तेन यमेन जीवामः ।

७. प्रियहितद्वारेणाश्रयणीयमाश्रयेदिति ननु न्याय्य एवायमर्थः ।

**प्र. ३. द्वौ सविस्तरं लिखत।** (३०)

१. मुद्राराक्षसनाटके नायकः कः।

२. विशाखादत्तस्य परिचयं लिखित्वा लेखनवैशिष्ट्यानि विवेचयत।

३. मुद्राराक्षसनाटकस्य शीर्षकम्।

**प्र.४. अ) सन्धीन् विघटयत।** (०६)

भर्तॄननुयामि आप्तैरप्यनवाप्तपौरुषफलैः द्वितयमभियुक्तेन

**आ) रूपपरिचयं लिखत।** (१०)

प्रतिहन्यमानाः पृथिव्याम् पश्य इदम् हत्वा

----------------